(क) अनुरूपं योजयत :-

| अ | ब |
|---|---|
| (i) नाहं बलाका | (i) दशकुमारचरितम् |
| (ii) कुमारलवस्य वीररसावेश: | (ii) कथासरित्सागर: |
| (iii) दण्डनीति: | (iii) उत्तररामचरितम् |

3

(ड) अनुरूपं योजयत :-

| अ | ब |
|---|---|
| (अ) भास: | (ह) किरातार्जुनीयम् |
| (इ) अश्वघोष: | (य) स्वप्नवासवदत्तम् |
| (उ) भारवी | (व) बुद्धचरितम्। |

3





## Bachelor of Science B.Sc./B.C.A./B.Sc.(I.T.) Semester—I Examination SANSKRIT (Compulsory)

समय—होरात्रयम्] [पूणाङ्का—60

**सूचना** :– विशेषनिर्देशाभावे उत्तराणि स्वीकृत भाषया लिखत।

1. शिष्यानुशासनम् इति पाठस्य आधारेण आचार्यकृतम् उपदेशं लिखत।

**अथवा**

राजश्री-विवाह-निश्चय: इति पाठस्य सारांशं लिखत। 12

2. कथां लिखत :-

सहाय: क्षेमकारक: **अथवा** इन्द्रियकथा। 12

3. अनुवादं कुरुत :

(अ) प्रथम : प्राह–वत्स, यदि त्वं प्रणतोऽसि ततो दीर्घायुर्भव। वद कुत आगम्यते, किं ते नाम, अत्र च किं कार्यम्। द्वितीय : प्राह – विप्र भास्कर इति मे नाम। पश्चिमसमुद्रतीरे प्रभासतीर्थसमीपे वसतिर्मम। तत्र भोजस्य वितरणं बहुभिर्वर्णितम्। ततो याचितुमहमागत:। त्वं मम वृद्धत्वात् पितृकल्पोऽसि। त्वमपि स्वं परिचयं वद। स आह–वत्स, शाकल्य इति मे नाम। मयैकशिलानगर्या आगम्यते भोजं प्रति द्रविणाशया। वत्स, त्वयानुक्तमपि दु:खं त्वयि ज्ञायते। 6

**अथवा**



rtmnuonline.com

NAGPURSTUDY.COM

बाल: – जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये।

प्रथमा – अविनीत किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ? हन्त वर्धते तव संरम्भः। स्थाने खलु ऋषिजनेन 'सर्वदमन इति कृतनामधेयोऽसि।

राजा – किं न खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः? नूनमनपत्यता मां वत्सलयति।

द्वितीया – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं न मुञ्चसि।

बाल: – (सस्मितं) अहो, बलीयः खलु भीतोऽस्मि।

(ब) निम्नलिखिंत परिच्छेदं पठित्वा उत्तराणि **संस्कृतभाषया** लिखत : 6

आसीत् श्रीमन्नृपति-विक्रमादित्यस्य राज्ये पुरन्दरपुरं नाम नगरम्। तत्र कश्चिन्महाधनिकः श्रेष्ठो न्यवसत्। तस्य चत्वारः पुत्राः आसन्। अन्यदा तेन देहावसानसमये पुत्राः प्रोक्ताः – भो वत्साः युष्मामिः संभूय स्थेयम्। यदि स्थातुं न पारयेत् तदा मदीय शयनस्थाने मञ्चाधस्तात् युष्मन्नामाङ्किताः चत्वारः कलशाः सन्ति ते प्रत्येकं ग्राह्याः। तेन क्रमेण च सम्पत्तिविभाजनं कृत्वा सुखिनो भवेत्।

(1) विक्रमादित्यस्य राज्ये किं नगरम् आसीत् ?



(2) तत्र कः न्यवसत् ?

(3) तस्य कति पुत्राः आसन् ?

(4) तेन कदा पुत्राः प्रोक्ताः ?

(5) तेन कलशाः कुत्र स्थापिता ?

(6) अस्य पाठस्य नाम लिखत।

4. टिप्पणी**द्वयं** लिखत :-

(i) कालिदासः

(ii) वाल्मीकिः

(iii) व्यासः

(iv) भवभूतिः 12

5. **वाक्यद्वयस्य** ससंदर्भं स्पष्टीकरणं लिखत :-

(अ) अहो रामभद्रस्य क्षिप्रकारिता।

**अथवा**

ज्ञानविघ्नमहङ्कारः। 3

(ब) तादृशं नररत्नं बहिरालोक्य रत्नाकरः उत्तरलितः।

**अथवा**

अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः। 3



rtmnuonline.com